।। અથ ચન્દ્રશેખરાષ્ટકમ્।।

ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર પાહિમામ્ ।
ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૧।।

રત્નસાનુશરાસનં રજતાદિશૃઙ્ગનિકેતનં
સિઞ્જિનીકૃતપન્નગેશ્વરમચ્યુતાનનસાયકમ્ ।
ક્ષિપ્રદગ્ધપુરત્રયં ત્રિદિવાલયૈભિવન્દિતં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ।। ૨।।

પચપાદપપુષ્પગન્ધપદામ્બુજદ્વયશોભિતં
ભાલલોચનજાતપાવકદગ્ધમન્મથવિગ્રહ.મ ।
ભસ્મદિગ્ધકલેવરં ભવનાશનં ભવમવ્યયં
ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૩।।

મત્ત્વારણમુખ્યચર્મકૃતોત્તરીમનોહરં
પઙ્કજાસનપદ્મલોચનપુજિતાઙ્ઘ્રિસરોરુહમ્ ।
દેવસિન્ધુતરઙ્ગસીકર સિક્તશુભ્રજટાધરં
ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૪।।

યક્ષરાજસખં ભગાક્ષહરં ભુજઙ્ગવિભૂષણં
શૈલરાજસુતા પરિષ્કૃત ચારુવામકલેવરમ્ ।
ક્ષ્વેડનીલગલં પરશ્વધધારિણં મૃગધારિણં
ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૫।।

કુણ્ડલીકૃતકુણ્ડલેશ્વરકુણ્ડલં વૃષવાહનં
નારદાદિમુનીશ્વરસ્તુતવૈભવં ભુવનેશ્વરમ્ ।
અન્ધકાન્ધકામા શ્રિતા મરપાદપં શમનાન્તકં
ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૬।।

ભષજં ભવરોગિણામખિલાપદામપહારિણં
દક્ષયજ્ઞર્વિનાશનં ત્રિગુણાત્મકં ત્રિવિલોચનમ્ ।

ભુક્તિમુક્તફલપ્રદં સકલાઘસઙ્ઘનિવર્હનં
    ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૭।।
ભક્ત વત્સલમચિતં નિધિમક્ષયં હરિદમ્બરં
    સર્વભૂતપતિં પરાત્પર પ્રમેયમનુત્તમમ્ ।
સોમવારિજ ભૂહુતાશનસોમપાનિલખાકૃતિં
    ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષમામ્ ।। ૮।।
વિશ્વસૃષ્ટિવિધાલિનં પુનરેવ પાલનતત્પરં
    સંહરન્તમપિ પ્રપચમ શેષલોકનિવાસિનમ્ ।
ક્રિડયન્તમહર્નિશં ગણનાથયૂથ સમન્વિતં
    ચન્દ્રશેખર ચન્દ્રશેકર ચન્દ્રશેકર રક્ષમામ્ ।। ૯।।
મૃત્યુભીતમૃકણ્ડસૂનુકૃતસ્તવ શિવ સન્નિધૌ
    યત્ર કુત્ર ચ પઠેન્નહિ તસ્ય મૃત્યુભયં ભવેત્ ।
પૂર્ણમાયુરરોગિતામખિલાથ સમ્પદમાદરં
    ચન્દ્રશેખર એવ તસ્ય દદાતિ મુક્તિમયત્નતઃ ।। ૧૦।।

।।। ઇતિ ચન્દ્રશેખરાષ્ટકમ્।।